# || श्रीमहाशूलिनी दिव्यसहस्रनाम स्तोत्रम् ||

www.kamakotimandali.com

**ध्यानम्**

कल्पान्तानलकोटिकोटिसदृशं घोरं त्रिशूलायुधं
पाणिभ्यां परिगृह्य पञ्चवदनस्कन्धेऽधिरुह्य स्थिताम् |
विश्वासावृतवीरशक्तिविविधक्रीडाविशेषारवै-
स्तत्तत् क्षुद्रसमस्तशत्रुनिवहां वन्दे महाशूलिनीम् ||

श्रीदुर्गा त्रिजगन्माता श्रीमत्कैलासवासिनी
हिमाचलगुहकान्तमाणिक्यमणिमण्टपा
गिरिदुर्गा गौरहस्ता गणनाथवृताङ्गणा
कल्पकारण्यसंवीतमालतीकुञ्जमन्दिरा
धर्मसिंहासनारूढा डाकिन्यादिसमाश्रिता
शुद्धविद्याधरामर्त्यवधूटीनिकरस्तुता
चिन्तामणिशिलाक्लृप्तद्वारावळिगृहान्तरा
कटाक्षवीक्षणापेक्षकमलाक्षिसुराङ्गना
लीलाभाषणसंलोलकमलासनवल्लभा
यामळोपनिषन्मन्त्रविलापच्छुकपुङ्गवा
दूर्वादिलश्यामरूपा दुर्वारमदविह्वला
नवकोरकसम्पच्छ्रीकल्पकारण्यकुन्तला
वेणीकैतकबर्हांशुविजितस्मरपट्टसा

कचसीमन्तरेखान्तलम्बमाणिक्यलम्बिका
पुष्पबाणशरालीढघनधम्मिल्लभूषणा
फालचन्द्रकलाप्रान्तसत्सुधाबिन्दुमौक्तिका
चूळीकादम्बिनीश्लिष्टचन्द्रकेरेखाललाटिका
चन्द्रमण्डलसंयुक्तभौमकुङ्कुमरेखिका
केशाभ्रमुक्तकोदण्डसदृग्भ्रूलतिकाञ्चिता
मारचापलसच्छुभ्रमृगनाभिविशेषका
कर्णपूरितकल्हारकाङ्क्षितापाङ्गवीक्षणा
क्षीराशयोत्पलाकारविलसत्कृष्णतारका
नेत्रपङ्केरुहान्तस्थभ्रमद्+भ्रमरतारका
गरलावृतकल्लोलनिमेषाञ्जनभासुरा
तीक्ष्णाग्रधारप्रद्युम्नशस्त्रप्रत्यस्त्रवीक्षणा
मुखचन्द्रसुधापूरलुठन्मीनाभलोचना
मौक्तिकावृतताटङ्कमण्डलद्धमण्डिता
कन्दर्पध्वजताकीर्णमकराङ्कितकुण्डला
कर्णरत्नौघचिन्तार्ककमनीयमुखाम्बुजा
कारुण्यस्यन्दिवदना गण्डमूलसुकुङ्कुमा
ओष्ठबिम्बफलामोदशुकतुण्डाभनासिका
तिलचम्पकपुष्पश्रीनासिकाभरणोज्ज्वला
नासाचम्पकसंस्रस्तमधुबिन्दुकमौक्तिका
मुखपङ्कजकिञ्जल्कमुक्ताजालसुनासिका
साळुवेशमुखास्वादलोलुपाधरपल्लवा
रदनांशुनटीरङ्गप्रस्तावनपटाधरा

दन्तलक्ष्मीगृहद्वारनीहारांश्वधरच्छदा
विद्रुमाधरबालार्कमिश्रस्मेरांशुकौमुदी
मन्त्रबीजाङ्कुराकारद्विजावळिविराजिता
सल्लापलक्ष्मीमाङ्गल्यमौक्तिकस्रग्रदालया
ताम्बूलसारसौगन्धिसकलाम्नायतालुका
कर्णलक्ष्मीविलासार्धमणिदर्पणगण्डभूः
कपोलमुकुराक्रान्तकर्णताटङ्कदीधितिः
मुखपद्मरजस्थूलहरिद्राचूर्णमण्डिता
गण्डादर्शप्रभासान्द्रविजितश्रीविराजिता
देशिकेशहृदानन्दसम्पच्छुबुकपेटिका
शरभाधीशसंबद्धमाङ्गल्यमणिकन्धरा
कस्तूरीपङ्कसञ्जातगळनालमुखाम्बुजा
लावण्याम्भोधिमध्यस्थशङ्खसन्निभकन्धरा
गलशङ्खप्रसूतांशुमुक्तादामविराजिता
मालतीमल्लिकातुल्यभुजद्वयमनोहरा
कनकाङ्गदकेयूरच्छविनिर्जितभास्करा
प्रकोष्ठवलयाक्रान्तपरिवेशगृहद्युतिः
वलयद्वयवैडूर्यज्वालालीढकराम्बुजा
बाहुद्वयलताग्रस्थपल्लवाभकराङ्गुलिः
करपङ्केरुहभ्राम्यद्रविमण्डलकङ्कणा
अङ्गुलीविद्रुमलतापर्वस्वर्णाङ्गुळीयका
भाग्यप्रदकरान्तस्थशङ्खचक्राङ्कमुद्रिका
करपद्मदलप्रान्तभास्वद्रत्ननखाङ्कुरा

रत्नग्रैवेयहारादिरमणीयकुचान्तरा
प्रालम्बिकौस्तुभमणिप्रभालिप्तस्तनान्तरा
शरभादीशनेत्रांशुकञ्चुकस्तनमण्डला
रतीविवाहकालश्रीपूर्णकुम्भस्तनद्वया
अनङ्गजीवनप्राणमन्त्रकुम्भस्तनद्वया
मध्यवल्लीप्राज्यफलद्वयवक्षोजभासुरा
स्तनपर्वतपर्यन्तचित्रकुङ्कुमपत्रिका
भ्रमरालीढराजीवकुड्मलस्तनचूचुका
महाशरभहृद्रागरक्तवस्त्रोत्तरीयका
अनौपम्यातिलावण्यपार्ष्णिभागाभिनन्दिता
स्तनस्तबकराराजद्रोमवल्लीदलोदरा
कृष्णरोमावलीकृष्णसप्तपत्रोदरच्छविः
सौन्दर्यपूरसंपूर्णप्रवाहावर्तनाभिका
अनङ्गरसपूर्णाब्धितरङ्गाभवळित्रया
सन्ध्यारुणांशुकौसुम्भपटावृतकटीकटी
सप्तकिङ्किणिकाचिञ्चद्रत्नकान्तिकलापिनी
मेखलादामसङ्कीर्णमयूखावृतनीविका
सुवर्णसूत्राकलितसूक्ष्मरत्नाम्बराचला
वीरेश्वरानङ्गसरित्पुळिनीजघनस्थला
असादृश्यनितम्बश्रीरम्यरम्भोरुकाण्डयुक्
हलमल्लकनेत्राभव्याप्तसन्धिमनोहरा
जानुमण्डलधिक्कारिराशिकूटतटीकटी
स्मरतूणीरसङ्काशजङ्घाद्वितयसुन्दरी

गुल्फद्वितयसौभाग्यजिततालफलद्वयी
द्विमणिर्मङ्गलाभाङ्घ्रियुग्मनूपुरमण्डला
रणद्वलयसल्लापद्रत्नमालाभपादुका
प्रपदात्मकशस्त्रौघविलसद्धर्मपुस्तका
आधारकूर्मपृष्ठाभपादपृष्ठविराजिता
पादाङ्गुलिप्रभाजालपराजितदिवाकरा
चक्रचामरमत्स्याङ्कचरणस्थलपङ्कजा
सुरेन्द्रकोटिमकुटीरत्नसङ्क्रान्तपादुका
अव्याजकरुणागुप्ततनुरव्याजसुन्दरी
शृङ्गाररससाम्राज्यपदपट्टाभिषेचिता
शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला
उमा कात्यायनी भद्रा पार्वती पावनाकृतिः
मृडाणी चण्डिका माता रतिर्मङ्गलदेवता
काली हैमवती वीरा कपाली शूलधारिणी
शरभा शाम्भवी माया तन्त्रा तन्त्रार्थरूपिणी
तरुणा धर्मदा धर्मा तापसी तारकाकृतिः
हरा महेश्वरी मुग्धा हंसिनी हंसवाहना
भाग्या बलकरी नित्या भक्तिगम्या भयापहा
मातङ्गी रसिका मत्ता मालिनी माल्यधारिणी
मोहिनी मुदिता कृष्णा मुक्तिदा मोदहर्षिता
शृङ्गारी श्रीकरी शूरा जयिनी जयशृङ्खला
सती तारात्मिका तन्वी तारनादा तटित्प्रभा
अपर्णा विजया नीवी रजिता त्वपराजिता

शाङ्करी रमणी रामा शैलेन्द्रतनया मही
बाला सरस्वती लक्ष्मीः परमा परदेवता
गायत्री रसिका विद्या गङ्गा गम्भीरवैभवा
देवी दाक्षायणी दक्षा दमनी दारुणप्रभा
मारी मारकरी मृष्टा मन्त्रिणी मन्त्रविग्रहा
ज्वालामयी परा रक्ता ज्वालाक्षी धूम्रलोचना
वामा कुतूहला कुल्या कोमला कुड्मलस्तनी
दण्डिनी मुण्डिनी धीरा जयकन्या जयङ्करी
चामुण्डी चण्डमुण्डेशी चण्डमुण्डनिषूदिनी
भद्रकाली वह्निदुर्गा पालितामरसैनिका
योगिनीगणसंवीता प्रबला हंसगामिनी
शुम्भासुरप्राणहन्त्री सूक्ष्मा शोभनविक्रमा
निशुम्भवीर्यशमनी निर्निद्रा निरुपप्लवा
धर्मसिंहावृता माली नारसिंहाङ्गलोलुपा
भूजाष्टकयुता तुङ्गा तुङ्गसिंहासनेश्वरी
राजराजेश्वरी ज्योत्स्ना राज्यसाम्राज्यदायिनी
मन्त्रकेलिशुकालापा महनीया महाशना
दुर्वारिकरुणासिन्धुर्धूमला दुष्टनाशिनी
वीरलक्ष्मीर्वीरपूज्या वीरवेषमहोत्सवा
वनदुर्गा वह्निहस्ता वाञ्छितार्थप्रदायिनी
वनमालिका च वाराही वागासारनिवासिनी
एकाकिन्येकसिंहस्था चैकदन्तप्रसूतिनी
नृसिंहचर्मवसना निर्निरीक्ष्या निरङ्कुशा

नृपालवीर्या निर्वेगा नीचग्रामनिषूदिनी
सुदर्शनास्त्रदर्पघनी सोमखण्डावतंसिका
पुळिन्दकुलसंसेव्या पुष्पधत्तूरमालिका
गुञ्जामणिलसन्माला शङ्खताटङ्कशोभिनी
मातङ्गमदसिन्दूरतिलका मधुवासिनी
पुळिन्दिनीश्वरी श्यामा चलचेला कटिस्थला
बर्हावतंसधमिल्ला तमालश्यामलाकृतिः
शत्रुसंहारशस्त्राङ्गा पाशकोदण्डधारिणी
कङ्काली नारसिंहाङ्गरक्तपानसमुत्सुका
वसामालिनिवाराहदंष्ट्राप्रालम्बमालिका
सन्ध्यारुणजटाधारी कालमेघसमप्रभा
चतुर्मुखशिरोमाला सर्पयज्ञोपवीतिनी
दक्षयज्ञानलध्वंसी दलितामरडाम्भिका
वीरभद्रामोदकरी वीराटोपविहारिणी
जलदुर्गा महामत्तमनुजप्राणभोजिनी
परमन्त्रदण्डिनी वह्निज्वालाकीर्णत्रिलोचना
शत्रुशल्यमया मेघनादनिर्विण्णदानवा
राक्षसप्राणमथना वक्रदंष्ट्रमहोज्ज्वला
क्षुद्रग्रहापहा क्षुद्रमन्त्रतन्त्रक्रियापहा
व्याघ्राजिनाम्बरधरा व्याळकङ्कणभूषणा
बलिपूजाप्रिया क्षुद्रपैशाचमदनाशिनी
सम्मोहनास्त्रमन्त्राभा दानवौघविनाशिनी
कामाक्रान्तमनोवृत्तिः कामकेळीकलारता

कर्पूरवीटिकाप्रीता कामिनीजनमोहिनी
स्वप्नवती स्वप्नाभोगा ध्वंसिताखिलदानवा
आकर्षणक्रियालोला चाश्रिताभीष्टदायिनी
ज्वालामुखी ज्वालनेत्रा ज्वालाङ्गा ज्वरनाशिनी
शल्याकरी शल्यहन्त्री शल्यमन्त्राचलाऽचला
चतुर्थ्या कुहरा रौद्री तापघनी तरुनाशिनी
दारिद्र्यशमनी क्रुद्धा व्याधिनी व्याधिनाशिनी
ब्रह्मरक्षोहरा ब्राह्मी गणहारी गणेश्वरी
आवेशग्रहसंहारी हन्त्री मन्त्री हरिप्रिया
कृत्तिका कृत्तिहरणा गौरी गम्भीरमानसा
युद्धप्रीता युद्धकारी योद्धृगण्या युधिष्ठिरा
तुष्टिदा पुष्टिदा पुण्या भोगमोक्षफलप्रदा
अपापा पापशमना त्वरूपा रूपदारुणा
अन्नदा धनदा पूता त्वणिमादिफलप्रदा
सिद्धिदा बुद्धिदा शूला शिष्टाचारपरायणा
अमाया ह्यमराराध्या हंसमन्त्रा हलायुधा
क्षामप्रध्वंसिनी क्षोभ्या शार्दूलासनवासिनी
सत्त्वरूपा तमोहन्त्री सौम्या सारङ्गपावना
द्विसहस्रकरा शुद्धा स्थूलसिंहसुवासिनी
नारायणी महावीर्या नादबिन्द्वन्तरात्मिका
षड्गुणा तत्त्वनिलया तत्त्वातीतामृतेश्वरी
सुरमूर्तिस्सुराराध्या सुमुखी कालरूपिणी
सन्ध्यारूपा कान्तिमती खेचरी भुवनेश्वरी

मूलप्रकृतिरव्यक्ता महामाया मनोन्मनी
ज्येष्ठा वामा जगन्मूला सृष्टिसंहारकारणा
स्वतन्त्रा स्ववशा लोकभोगदा सुरनन्दिनी
चित्रा चित्रकृतिश्चैव सचित्रवसनप्रिया
विषापहा वेदमन्त्रा वेदविद्या विलासिनी
कुण्डली कन्दनिलया गुह्या गुह्यकवन्दिता
कालरात्रिः कलानिष्ठा कौमारी काममोहिनी
वश्यादिनी वरारोहा वन्दारुजनवत्सला
संज्वालामालिनी शक्तिः सुरप्रीता सुवासिनी
महिषासुरसंहारी मत्तमातङ्गगामिनी
मदगन्धितमातङ्गी विद्युद्धामाभिसुन्दरी
रक्तबीजासुरध्वंसी वीरबाणासुरेक्षणा
महिषोत्तमसंरूढा मांसप्रेतायुधाञ्चला
यशोवती हेमकूटतुङ्गशृङ्गनिकेतना
दानकल्पकसच्छाया सन्तानादिफलप्रदा
आश्रिताभीष्टवरदा चाखिलागमगोपिता
दारिद्र्यशैलदंभोलिः क्षुद्रपङ्कजचन्द्रिका
रोगान्धकारचण्डांशुः पापद्रुमकुठारिका
भवाटवीदाववह्निः शत्रुतूलस्फुलिङ्गरुक्
स्फोटकोरकमायूरी क्षुद्रप्राणनिवारिणी
अपस्मारमृगव्याघ्री चित्तक्षोभविमोचनी
क्षयमातङ्गपञ्चास्या कृच्छ्रवर्गापहारिणी
पीनासश्वासकाशघनी पिशाचोपाधिमोचिनी

विवादशमनी लोकबाधापञ्चकनाशिनी
अपवादहरा सेव्या संग्रामविजयप्रदा
रक्तपित्तगलव्याधिहरा हरविमोहिनी
क्षुद्रशल्यहरा दासकार्यारम्भसमुत्सुका
कुष्ठगुल्मप्रमेहघनी गूढशल्यविनाशिनी
भक्तिमत्प्राणसौहार्दा सुहृद्वंशाभिवर्धिका
उपास्या चाखिलम्लेच्छमदमानविमोचिनी
भैरवी भीषणा भीषा भिन्नारातिरणाञ्चला
व्यूहध्वंसी वीरहव्या वीर्यात्मा व्यूहरक्षिका
महाराष्ट्रा महासेना मांसाशी माधवानुजा
व्याघ्रध्वजा वज्रनखी वज्री व्याघ्रनिषूदिनी
खड्गिनी कन्यकावेषा कौमारी खड्गवासिनी
संग्रामवासिन्यन्तास्त्रा धीरज्या सायकासना
कोदण्डध्वनिकृत् क्रुद्धा क्रूरदृष्टिभयानका
वीराग्रगामिनी दुष्टा सन्तुष्टा शत्रुभक्षिनी
सन्ध्याटवीचरा वित्तगोपना वित्तकृच्छला
कैटकभासुरसंहारी काली कल्याणकोमला
नन्दिनी नन्दचरिता नरकालयमोचना
मलयाचलशृङ्गस्था गन्धिनी सुरतालसा
कादम्बरी कान्तिमती कान्ता कादम्बराशना
मधुदानवविद्रावी मधुपा पाटलारुणा
रात्रिञ्चरा राक्षसघनी रामा रात्रिसमर्चिता
शिवरात्रिमहापूज्या देवलोकविहारिणी

ध्यानाधिकालसंजाप्या भक्तसन्तानभाग्यदा
मध्याह्नकालसन्तप्या जय संहारशूलिनी
त्र्यम्बका मखविध्वंसी त्रिपुरा त्रिपुरशूलिनी
रङ्गस्था रञ्जनी रङ्गा सिन्दूरारुणशालिनी
सुन्दर्युपसुन्दरी तु सूक्ष्मा मोहनशूलिनी
अष्टमूर्तिः कलानाथा चाष्टहस्ता सुतप्रदा
अङ्गारका गोपनाक्षी हंसासुरमदापहा
आपीनस्तननम्राङ्गी हरिद्रालेपितस्तनी
इन्द्राक्षी हेमसङ्काशा हेमवस्त्रा हरप्रिया
ईश्वरी त्वितिहासात्मा ईतिबाधानिवारिणी
उपास्या चोन्मदाकारा ह्युल्लङ्घितसुरापहा
ऊषरस्थलकासारा ह्युत्पलश्यामलाकृतिः
ऋङ्मयी सामसङ्गीता शुद्धा वै कल्पवल्लरी
सायन्तनाहुतिर्दासकामधेनुस्वरूपिणी
पञ्चादशाक्षरीमन्त्रा तारकावृतषोडशा
ह्रींकारनिष्ठा ह्रींकारा हुङ्कारी दुरितापहा
षडङ्गा नवकोणस्था त्रिकोणा सर्वतोमुखी
सहस्रवदना पद्मा शूलिनी सुरपालिनी
महाशूलधरा शक्तिर्माता माहेन्द्रपूजिता
शूलदुर्गा शूलहरा शोभना चैव शूलिनी
श्रीशूलिनी जगद्बीजा मूलहुङ्कारशूलिनी
प्रकाशा परमाकाशा भाविता वीरशूलिनी
नारसिंही महेन्द्राणी साळी शरभशूलिनी

ऋङ्का ऋतुमती चैवाघोराथर्वणगोपिका
घोरघोरा जपारागप्रसूनाञ्चितमालिका
सुस्वरूपा सौहृदाढ्या लीढा दाडिमपाटला
लया च लम्पटा लीना कुङ्कुमारुणकन्धरा
ऌकाराढ्या त्विळानाथा त्विळावृतजनावृता
ऐश्वर्यनिष्ठा हरिता हरितालसमप्रभा
महाशना महाभोज्या युक्ता युक्तभटान्विता
औत्सुक्या चाणिमद्गम्या त्वखिलाण्डनिवासिनी
हंसमुक्तामणिश्रेणीर्हंसाख्या हासकारिणी
कलिदोषहरा क्षीरपायिनी विप्रपूजिता
खट्वाङ्गस्था खड्गरूपा खबीजा खरसूदना
आज्यपायिन्यस्थिमाला पार्थिवाराध्यबाहुका
गम्भीरनाभिका सिद्धकिन्नरस्त्रीसमावृता
खड्गात्मिका घननिभा वैश्याच्र्या माक्षिकप्रिया
मकारवर्णा गम्भीरा शूद्राच्र्या चसवप्रिया
चातुरीपार्वणाराध्या मुक्ताधावल्यरूपिणी
छन्दोमयी भौमपूज्या दुष्टशत्रुविनाशिनी
जयिनी चाष्टमीसेव्या क्रूरहोमसमन्विता
झङ्कारी नवमीपूज्या लाङ्गलीकुसुमप्रिया
सदाचतुर्दशीपूज्या भक्तानां पुष्टिकारिणी
ज्ञानगम्यादर्शपूज्या डामरी रिपुमारिणी
सततं कल्पसंवेद्या कलिकालसुसन्धिदा
डम्भाकारा कल्पसिद्धा शल्यकौतुकवर्धिनी

ढाकृतिर्कविवराराध्या सर्वसम्पत्प्रदायिका
नवरात्रिदिनाराध्या राष्ट्रदा राष्ट्रवर्धिनी
पानासवमदध्वंसी मूलिकासिद्धिदायिनी
फलप्रदा कुबेराढ्या पारिजातप्रसूनभाक्
बलिमन्त्रौघसंसिद्धा मन्त्रिचिन्त्यफलावहा
भक्तिप्रिया भक्तिगम्या किङ्करा भगमालिनी
माधवीविपिनान्तस्था महती महिषार्दिनी
यजुर्वेदगता शङ्खचक्रहस्ताम्बुजद्वया
राजसा राजमातङ्गी राकाचन्द्रनिभानना
लाघवा राघवाराध्या रमणीजनमध्यगा
वागीश्वरी वकुळमाल्या वाङ्मयी वारितासुखा
शरभाधीशवनिता चन्द्रमण्डलमध्यगा
षडध्वान्तरतारा च रक्तजुष्टा हुतावहा
तत्त्वज्ञानानन्दकलामयी सायुज्यसाधना
कर्मसाधकसंलीनघनदर्शनदा सदा
हुङ्कारिका स्थावरात्मा त्वमरी लास्यमोदना
लंकारत्रयसंभूता ललिता लक्ष्मणार्चिता
लक्ष्ममूर्तिः सदाहारा प्रसादावासलोचना
नीलकण्ठी हरिद्राश्मिः शुकी गौरी च गोत्रजा
अपर्णा यक्षीणी यक्षा हरिद्रा हलिनी हली
ददती चोन्मदा चोर्मी रसा विश्वंभरा स्थिरा
पञ्चास्या पञ्चमी रागा भाग्या योगात्मिकाम्बिका
गणिका चैव काली तु वीणा शोणा रणात्मिका

रमा दूती कला सिंही लज्जा धूमवती जडा
भृङ्गी सङ्गी सखी पीना स्नेहारोग्या मनस्विनी
रणी मृडा दृढा ज्येष्ठा रमणी यमुना रता
मुसली कुण्ठिता मोटी चण्डाखण्डा गणा बला
शुक्ला स्रष्ट्री वशा ज्ञानी मानी नीलालका शची
सूरी चन्द्रा घृणिर्घोषा वीर्यक्रीडारसावहा
नूत्ना सोमा महाराज्ञी गया यागा हुतप्रभा
धूर्ता सुधा धना लीना पुष्टिर्मृष्टा सुधाकरा
करिणी कामिनी मुक्तामणिश्रेणिः फणी खरा
ताक्ष्यार्या सूक्ष्मा नताचार्या गौरिका गिरिजाङ्गना
इन्द्रजाला चेन्दुमुखी त्विन्द्रोपेन्द्रादिसंस्तुता
शिवदूती च गरला शितिकण्ठकुटुम्बिनी
ज्वलन्ती ज्वलनाकारा ज्वाला जाज्वल्यदम्भदा
ज्वालाशया ज्वालामणिर्ज्योतिषां गतिरेव हि
ज्योतिःशास्त्रानुमेयात्मा ज्योतिषी ज्वलितोज्ज्वला
ज्योतिष्मती दुर्गवासी ज्योत्स्नाभा ज्वलनार्चिता
लङ्कारी ललितावासा ललिता ललितात्मिका
लङ्काधिपा लास्यलोला लयभोगमया लया
लावण्यशालिनी लोला लाङ्गला ललिताम्बिका
लाञ्छना लम्पटालङ्घया लकुलार्णवमुक्तिदा
ललाटनेत्रा लज्जाढ्या लास्यालापा मदाकरा
ज्वालाकृतिर्ज्वलद्बीजा ज्योतिर्मण्डलमध्यगा
ज्योतिस्तंभा ज्वलद्वीर्या ज्वलन्मात्रा ज्वलत्पला

जुषिरा जुम्पटा ज्योतिर्मालिका ज्योतिका स्मिता
ज्वलद्वलयहस्ताब्जा ज्वलत्प्रज्वलकोज्ज्वला
ज्वालामाल्या जगज्ज्वाला ज्वलज्ज्वलकसज्ज्वला
लंबीजा लेलिहासात्मा लीलाक्लिन्ना लयापहा
लज्जावती लब्धपुत्री लाकिनी लोलकुण्डला
लब्धभाग्या लब्धकामा लब्धधीर्लब्धमङ्गला
लब्धवीर्या लब्धवृता लाभा लब्धविनाशिनी
लसद्वस्त्रा लसत्पीठा लसन्माल्या लसत्प्रभा
शूलहस्ता शूरसेव्या शूलिनी शूलनाशिनी
सुकृत्यनुमती शूर्पा शोभना शूर्पधारिणी
शूलस्था शूरचित्तस्था शूला शुक्लसुरार्चिता
शुक्लपद्मासनारूढा शुक्ला शुक्लाम्बरा शुका
शुकलालितहस्ताब्जा श्वेता शुकनुता शुभा
ललिताक्षरमन्त्रस्था लिप्तकुङ्कुमभासुरा
लिपिरूपा लिप्तभस्मा लिप्तचन्दनपङ्किला
लीलाभाषणसंलोला लीनकस्तूरिकाद्रवा
लिखिताम्बुजचक्रस्था लिख्या लिखितवैभवा
नीलालका नीतिमती नीतिशास्त्रस्वरूपिणी
नीचघनी निष्कला नित्या नीलकण्ठप्रियाङ्गना
निराशा निर्गुणा नीता निर्मदा निरुपप्लवा
निर्नीता निर्मला निष्ठा निरङ्कुशपराक्रमा
निर्विण्णदानवबला निश्शेषीकृतताटका
निरञ्जनकरा मन्त्री निर्विघनपदनाशिनी

नित्यक्लिन्ना निराहारा नीवी नीलाम्बराञ्चिता
निशाचरकुलध्वंसी नित्यानन्दपरम्परा
निम्बप्रिया निरावेशा निन्दितासुरसुन्दरी
निर्घोषा निगळाकृष्टकृत्तिजालावृताङ्गणा
नीरसा नित्यकल्याणी निरन्तरसुखप्रदा
निर्लोभा नीतिमत्प्रीता निर्वघना निमिषापहा
दुंबीजा दुष्टसंहारी दुर्मदा दुरितापहा
दुरुत्साहमहावीर्या दुर्मेदोत्सवनाशिनी
दुर्मांसभक्षिणी दुष्टा दूरीकृतनिशाचरा
दूती दुष्टग्रहमदखण्डी दुर्बलरक्षका
ष्टङ्कारी ष्टम्मयी ष्टम्भा ष्टंबीजा ष्टम्भकीलका
ग्रहेश्वरी ग्रहाराध्या ग्रहिणी रोगमोचिनी
ग्रहावेशकरी ग्राह्या गृहग्रामाभिरक्षिणी
ग्रामौषधमहावीर्या ग्राम्यसर्वभयापहा
ग्रहद्वेषी ग्रहारूढा ग्रामणी ग्रामदेवता
गृहीतब्रह्ममुख्यास्त्रा गृहीतायुधशक्तिदा
ग्रासमांसा गृहस्थाच्र्या ग्रहभूतनिवारिणी
हंभूता हलधृक्सेव्या हरहारिकुचाञ्चला
हर्षप्रदा हराराध्या हासनिन्द्यनिशाचरा
हविर्भोक्त्री हरिद्राभा हरिताश्वाधिरोहिणी
हरित्पतिसमाराध्या हलाकृष्टसुरासुरा
हारीतशुकवत्पाणिर्हेयमेधाभिरक्षकी
हंसाक्षरी हंसबीजा हाहाकारा हराशुगा

हय्यङ्गवीनहृद्वृत्तिर्हरीतांशुमणिद्युतिः
हुङ्कारात्मा हुता होम्या हुङ्कारालयनायिका
हुङ्कारपञ्जरशुका हुङ्कारकमलेन्दिरा
हुङ्काररात्रिकाज्योत्स्ना हुङ्कारद्रुममञ्जरी
हुङ्कारदीपिकाज्वाला हुङ्कारार्णवकौमुदी
हुं फट्करी हुं फट् द्युतिः हुङ्कारकाराकाशभास्करा
फट्कारी स्फाटिकाकारा स्फटिकाक्षकराम्बुजा
फट्कीलकारी फण्णास्त्रा फट्काराहिशिखामणिः
फट्कारसुमनोमाध्वी फट्कारकमलेन्दिरा
फट्कारसौधशृङ्गस्था फट्काराध्वरदक्षिणा
फट्कारशुक्तिकामूर्तिः पट्कारद्रुममञ्जरी
फट्कारवीरखड्गास्त्रा फट्कारतनुमध्यगा
फट्कारशिबिकारूढा फट्कारच्छत्रलाञ्छिता
फट्कारपीठनिलया फट्कारावृतमण्डला
फट्कारकुञ्जरमदप्रवाहा फाललोचना
फलाशीनी फलकरी फलदानपरायणा
फट्कारास्त्रफलाकारा फलन्ती फलवर्जिता
स्वातन्त्र्यचरिता स्वस्था स्वप्नग्रहनिषूदिनी
स्वाधिष्ठानाम्बुजारूढा स्वयम्भूता स्वरात्मिका
स्वर्गाधिपा स्वर्णवर्णा स्वाहाकारस्वरूपिणी
स्वयंवरा स्वरारोहा स्वप्रकाशा स्वरप्रिया
स्वचक्रराजनिलया स्वसैन्यविजयप्रदा
स्वप्रधाना स्वापकारी स्वकृताखिलवैभवा

स्वैरिणी स्वेदशमनी स्वरूपजितमोहिनी
हानोपाधिविनिर्मुक्ता हानिदौघनिरासना
हस्तिकुंभद्वयकुचा हस्तिराजाधिरोहिणी
हयग्रीवसमाराध्या हस्तिकृत्तिप्रियाङ्गना
हालीकृतस्वरकुला हानिवृद्धिविवर्जिता
हाहाहूहूमुखस्तुत्या हठदानितकृत्तिका
हतासुरा हतद्वेषा हाटकाद्रिगुहागृहा
हल्लीनटनसन्तुष्टा हरिगह्वरवल्लभा
हनुमद्गीतसङ्गीता हासिता हरिसोदरी
हकारकन्दरासिंही हकारकुसुमासवा
हकारतटिनीपूरा हकारजलपङ्कजा
हकारयामिनीज्योत्स्ना हकारखचितारसा
हकारचक्रबालार्का हकारमरुदीधितिः
हकारवासराङ्गी च हकारगिरिनिर्झरा
हकारवासगाङ्गीच हकारवनकुञ्जरी
हकारमधुमाधुर्या हकाराश्रमतापसी
हकारमधुवासन्ती हकारस्वरकाकली
हकारमन्त्रबीजार्णा हकारपटहध्वनिः
हकारनारीलावण्या हकारपरदेवता
नमो वेदान्तरूपायै दुर्गादिव्यै नमो नमः
नमो भक्तानुकम्पा तु दुर्गा श्रीपरदेवता
नमो नमो भगवति त्राहि मामपराधिनम्

|| इति शिवम् ||

# || śrīmahāśūlinī divyasahasranāma stotram ||

**dhyānam**

kalpāntānalakoṭikoṭisadṛśaṃ ghoraṃ triśūlāyudhaṃ
pāṇibhyāṃ parigṛhya pañcavadanaskandhe.adhiruhya sthitām |
viśvāsāvṛtavīraśaktivividhakrīḍāviśeṣāravai -
stattat kṣudrasamastaśatrunivahāṃ vande mahāśūlinīm ||

śrīdurgā trijaganmātā śrīmatkailāsavāsinī
himācalaguhakāntamāṇikyamaṇimaṇṭapā
giridurgā gaurahastā gaṇanāthavṛtāṅgaṇā
kalpakāraṇyasaṃvītamālatīkuñjamandirā
dharmasiṃhāsanārūḍhā ḍākinyādisamāśritā
śuddhavidyādharāmartyavadhūṭīnikarastutā
cintāmaṇiśilāklṛptadvārāvaḻigṛhāntarā
kaṭākṣavīkṣaṇāpekṣakamalākṣisurāṅganā
līlābhāṣaṇasaṃlolakamalāsanavallabhā
yāmaḻopaniṣanmantravilāpacchukapuṅgavā
dūrvādalaśyāmarūpā durvāramadavihvalā
navakorakasampacchrīkalpakāraṇyakuntalā
veṇīkaitakabarhāṃśuvijitasmarapaṭṭasā
kacasīmantarekhāntalambamāṇikyalambikā

puṣpabāṇaśarālīḍhaghanadhamillabhūṣaṇā
phālacandrakalāprāntasatsudhābindumauktikā
cūḻīkādambinīśliṣṭacandrakerekhālalāṭikā
candramaṇḍalasaṃyuktabhaumakuṅkumarekhikā
keśābhramuktakodaṇḍasadṛgbhrūlatikāñcitā
māracāpalasacchubhramṛganābhiviśeṣakā
karṇapūritakalhārakāṅkṣitāpāṅgavīkṣaṇā
kṣīrāśayotpalākāravilasatkṛṣṇatārakā
netrapaṅkeruhāntasthabhramad+bhramaratārakā
garalāvṛtakallolanimeṣāñjanabhāsurā
tīkṣṇāgradhārapradyumnaśastrapratyastravīkṣ
aṇā
mukhacandrasudhāpūraluṭhanmīnābhalocanā
mauktikāvṛtatāṭaṅkamaṇḍaladvamaṇḍitā
kandarpadhvajatākīrṇamakarāṅkitakuṇḍalā
karṇaratnaughacintārkakamanīyamukhāmbujā
kāruṇyasyandivadanā gaṇḍamūlasukuṅkumā
oṣṭhabimbaphalāmodaśukatuṇḍābhanāsikā
tilacampakapuṣpaśrīnāsikābharaṇojjvalā
nāsācampakasaṃsrastamadhubindukamauktikā
mukhapaṅkajakiñjalkamuktājālasunāsikā
sāḻuveśamukhāsvādalolupādharapallavā
radanāṃśunaṭīraṅgaprastāvanapaṭādharā
dantalakṣmīgṛhadvāranīhārāṃśvadharacchadā
vidrumādharabālārkamiśrasmerāṃśukaumudī
mantrabījāṅkurākāradvijāvaḻivirājitā
sallāpalakṣmīmāṅgalyamauktikasragradālayā
tāmbūlasārasaugandhisakalāmnāyatālukā
karṇalakṣmīvilāsārdhamaṇidarpaṇagaṇḍabhūḥ

kapolamukurākrāntakarṇatāṭaṅkadīdhitiḥ
mukhapadmarajasthūlaharidrācūrṇamaṇḍitā
gaṇḍādarśaprabhāsāndravijitaśrīvirājitā
deśikeśahṛdānandasampacchubukapeṭikā
śarabhādhīśasaṃbaddhamāṅgalyamaṇikandharā
kastūrīpaṅkasañjātagaḻanālamukhāmbujā
lāvaṇyāmbhodhimadhyasthaśaṅkhasannibhakandh
arā
galaśaṅkhaprasūtāṃśumuktādāmavirājitā
mālatīmallikātulyabhujadvayamanoharā
kanakāṅgadakeyūracchavinirjitabhāskarā
prakoṣṭhavalayākrāntapariveśagṛhadyutiḥ
valayadvayavaiḍūryajvālālīḍhakarāmbujā
bāhudvayalatāgrasthapallavābhakarāṅguliḥ
karapaṅkeruhabhrāmyadravimaṇḍalakaṅkaṇā
aṅgulīvidrumalatāparvasvarṇāṅguḻīyakā
bhāgyapradakarāntasthaśaṅkhacakrāṅkamudrikā
karapadmadalaprāntabhāsvadratnanakhāṅkurā
ratnagraiveyahārādiramaṇīyakucāntarā
prālambikaustubhamaṇiprabhāliptastanāntarā
śarabhādīśanetrāṃśukañcukastanamaṇḍalā
ratīvivāhakālaśrīpūrṇakumbhastanadvayā
anaṅgajīvanaprāṇamantrakumbhastanadvayā
madhyavallīprājyaphaladvayavakṣojabhāsurā
stanaparvataparyantacitrakuṅkumapatrikā
bhramarālīḍharājīvakuḍmalastanacūcukā
mahāśarabhahṛdrāgaraktavastrottarīyakā
anaupamyātilāvaṇyapārṣṇibhāgābhinanditā
stanastabakarārājadromavallīdalodarā

kṛṣṇaromāvalīkṛṣṇasaptapatrodaracchaviḥ
saundaryapūrasaṃpūrṇapravāhāvartanābhikā
anaṅgarasapūrṇābdhitaraṅgābhavaḻitrayā
sandhyāruṇāṃśukausumbhapaṭāvṛtakaṭīkaṭī
saptakiṅkiṇikāciñcadratnakāntikalāpinī
mekhalādāmasaṅkīrṇamayūkhāvṛtanīvikā
suvarṇasūtrākalitasūkṣmaratnāmbarācalā
vīreśvarānaṅgasaritpuḻinījaghanasthalā
asādṛśyanitambaśrīramyarambhorukāṇḍayuk
halamallakanetrābhavyāptasandhimanoharā
jānumaṇḍaladhikkārirāśikūṭataṭīkaṭī
smaratūṇīrasaṅkāśajaṅghādvitayasundarī
gulphadvitayasaubhāgyajitatālaphaladvayī
dvimaṇirmaṅgalābhāṅghriyugmanūpuramaṇḍalā
raṇadvalayasallāpadratnamālābhapādukā
prapadātmakaśastraughavilasaddharmapustakā
ādhārakūrmapṛṣṭhābhapādapṛṣṭhavirājitā
pādāṅguliprabhājālaparājitadivākarā
cakracāmaramatsyāṅkacaraṇasthalapaṅkajā
surendrakoṭimakuṭīratnasaṅkrāntapādukā
avyājakaruṇāguptatanuravyājasundarī
śṛṅgārarasasāmrājyapadapaṭṭābhiṣecitā
śivā bhavānī rudrāṇī śarvāṇī sarvamaṅgalā
umā kātyāyanī bhadrā pārvatī pāvanākṛtiḥ
mṛḍāṇī caṇḍikā mātā ratirmaṅgaladevatā
kālī haimavatī vīrā kapālī śūladhāriṇī
śarabhā śāmbhavī māyā tantrā
tantrārtharūpiṇī
taruṇā dharmadā dharmā tāpasī tārakākṛtiḥ

harā maheśvarī mugdhā haṃsinī haṃsavāhanā
bhāgyā balakarī nityā bhaktigamyā bhayāpahā
mātaṅgī rasikā mattā mālinī mālyadhāriṇī
mohinī muditā kṛṣṇā muktidā modaharṣitā
śṛṅgārī śrīkarī śūrā jayinī jayaśṛṅkhalā
satī tārātmikā tanvī tāranādā taṭitprabhā
aparṇā vijayā nīvī rajitā tvaparājitā
śāṅkarī ramaṇī rāmā śailendratanayā mahī
bālā sarasvatī lakṣmīḥ paramā paradevatā
gāyatrī rasikā vidyā gaṅgā gambhīravaibhavā
devī dākṣāyaṇī dakṣā damanī dāruṇaprabhā
mārī mārakarī mṛṣṭā mantriṇī mantravigrahā
jvālāmayī parā raktā jvālākṣī dhūmralocanā
vāmā kutūhalā kulyā komalā kuḍmalastanī
daṇḍinī muṇḍinī dhīrā jayakanyā jayaṅkarī
cāmuṇḍī caṇḍamuṇḍeśī caṇḍamuṇḍaniṣūdinī
bhadrakālī vahnidurgā pālitāmarasainikā
yoginīgaṇasaṃvītā prabalā haṃsagāminī
śumbhāsuraprāṇahantrī sūkṣmā śobhanavikramā
niśumbhavīryaśamanī nirnidrā nirupaplavā
dharmasiṃhāvṛtā mālī nārasiṃhāṅgalolupā
bhūjāṣṭakayutā tuṅgā tuṅgasiṃhāsaneśvarī
rājarājeśvarī jyotsnā rājyasāmrājyadāyinī
mantrakeliśukālāpā mahanīyā mahāśanā
durvārakaruṇāsindhurdhūmalā duṣṭanāśinī
vīralakṣmīrvīrapūjyā vīraveṣamahotsavā
vanadurgā vahnihastā vāñchitārthapradāyinī
vanamālikā ca vārāhī vāgāsāranivāsinī
ekākinyekasiṃhasthā caikadantaprasūtinī

nṛsiṃhacarmavasanā nirnirīkṣyā niraṅkuśā
nṛpālavīryā nirvegā nīcagrāmaniṣūdinī
sudarśanāstradarpaghnī somakhaṇḍāvataṃsikā
puḻindakulasaṃsevyā puṣpadhattūramālikā
guñjāmaṇilasanmālā śaṅkhatāṭaṅkaśobhinī
mātaṅgamadasindūratilakā madhuvāsinī
puḻindinīśvarī śyāmā calacelā kaṭisthalā
barhāvataṃsadhamillā tamālaśyāmalākṛtiḥ
śatrusaṃhāraśastrāṅgā pāśakodaṇḍadhāriṇī
kaṅkālī nārasiṃhāṅgaraktapānasamutsukā
vasāmālinivārāhadaṃṣṭrāprālambamālikā
sandhyāruṇajaṭādhārī kālameghasamaprabhā
caturmukhaśiromālā sarpayajñopavītinī
dakṣayajñānaladhvaṃsī dalitāmaraḍāmbhikā
vīrabhadrāmodakarī vīrāṭopavihāriṇī
jaladurgā mahāmattamanujaprāṇabhojinī
paramantradaṇḍinī vahnijvālākīrṇatrilocanā
śatruśalyamayā meghanādanirviṇṇadānavā
rākṣasaprāṇamathanā vakradaṃṣṭramahojjvalā
kṣudragrahāpahā kṣudramantratantrakriyāpahā
vyāghrājināmbaradharā vyāḻakaṅkaṇabhūṣaṇā
balipūjāpriyā kṣudrapaiśācamadanāśinī
sammohanāstramantrābhā dānavaughavināśinī
kāmākrāntamanovṛttiḥ kāmakeḻīkalāratā
karpūravīṭikāprītā kāminījanamohinī
svapnavatī svapnābhogā dhvaṃsitākhiladānavā
ākarṣaṇakriyālolā cāśritābhīṣṭadāyinī
jvālāmukhī jvālanetrā jvālāṅgā jvaranāśinī
śalyākarī śalyahantrī śalyamantrācalā.acalā

caturthyā kuharā raudrī tāpaghnī tarunāśinī
dāridryaśamanī kruddhā vyādhinī
vyādhināśinī
brahmarakṣoharā brāhmī gaṇahārī gaṇeśvarī
āveśagrahasaṃhārī hantrī mantrī haripriyā
kṛttikā kṛttiharaṇā gaurī gambhīramānasā
yuddhaprītā yuddhakārī yoddhṛgaṇyā
yudhiṣṭhirā
tuṣṭidā puṣṭidā puṇyā bhogamokṣaphalapradā
apāpā pāpaśamanā tvarūpā rūpadāruṇā
annadā dhanadā pūtā tvaṇimādiphalapradā
siddhidā buddhidā śūlā śiṣṭācāraparāyaṇā
amāyā hyamarārādhyā haṃsamantrā halāyudhā
kṣāmapradhvaṃsinī kṣobhyā śārdūlāsanavāsinī
sattvarūpā tamohantrī saumyā sāraṅgapāvanā
dvisahasrakarā śuddhā sthūlasiṃhasuvāsinī
nārāyaṇī mahāvīryā nādabindvantarātmikā
ṣaḍguṇā tattvanilayā tattvātītāmṛteśvarī
suramūrtissurārādhyā sumukhī kālarūpiṇī
sandhyārūpā kāntimatī khecarī bhuvaneśvarī
mūlaprakṛtiravyaktā mahāmāyā manonmanī
jyeṣṭhā vāmā jaganmūlā sṛṣṭisaṃhārakāraṇā
svatantrā svavaśā lokabhogadā suranandinī
citrā citrakṛtiścaiva sacitravasanapriyā
viṣāpahā vedamantrā vedavidyā vilāsinī
kuṇḍalī kandanilayā guhyā guhyakavanditā
kālarātriḥ kalāniṣṭhā kaumārī kāmamohinī
vaśyādinī varārohā vandārujanavatsalā
saṃjvālāmālinī śaktiḥ suraprītā suvāsinī

mahiṣāsurasaṃhārī mattamātaṅgagāminī
madagandhitamātaṅgī vidyuddhāmābhisundarī
raktabījāsuradhvaṃsī vīrabāṇāsurekṣaṇā
mahiṣottamasaṃrūḍhā māṃsapretāyudhāñcalā
yaśovatī hemakūṭatuṅgaśṛṅganiketanā
dānakalpakasacchāyā santānādiphalapradā
āśritābhīṣṭavaradā cākhilāgamagopitā
dāridryaśailadaṃbholiḥ
kṣudrapaṅkajacandrikā
rogāndhakāracaṇḍāṃśuḥ pāpadrumakuṭhārikā
bhavāṭavīdāvavahniḥ śatrutūlasphuliṅgaruk
sphoṭakorakamāyūrī kṣudraprāṇanivāriṇī
apasmāramṛgavyāghrī cittakṣobhavimocanī
kṣayamātaṅgapañcāsyā kṛcchravargāpahāriṇī
pīnāsaśvāsakāśaghnī piśācopādhimocinī
vivādaśamanī lokabādhāpañcakanāśinī
apavādaharā sevyā saṃgrāmavijayapradā
raktapittagalavyādhiharā haravimohinī
kṣudraśalyaharā dāsakāryārambhasamutsukā
kuṣṭhagulmapramehaghnī gūḍhaśalyavināśinī
bhaktimatprāṇasauhārdā
suhṛdvaṃśābhivardhikā
upāsyā cākhilamlecchamadamānavimocinī
bhairavī bhīṣaṇā bhīṣā bhinnārātiraṇāñcalā
vyūhadhvaṃsī vīrahavyā vīryātmā
vyūharakṣikā
mahārāṣṭrā mahāsenā māṃsāśī mādhavānujā
vyāghradhvajā vajranakhī vajrī
vyāghraniṣūdinī

khaḍginī kanyakāveṣā kaumārī khaḍgavāsinī
saṃgrāmavāsinyantāstrā dhīrajyā sāyakāsanā
kodaṇḍadhvanikṛt kruddhā
krūradṛṣṭibhayānakā
vīrāgragāminī duṣṭā santuṣṭā śatrubhakṣinī
sandhyāṭavīcarā vittagopanā vittakṛcchalā
kaiṭakabhāsurasaṃhārī kālī kalyāṇakomalā
nandinī nandacaritā narakālayamocanā
malayācalaśṛṅgasthā gandhinī suratālasā
kādambarī kāntimatī kāntā kādambarāśanā
madhudānavavidrāvī madhupā pāṭalāruṇā
rātriñcarā rākṣasaghnī rāmā rātrisamarcitā
śivarātrimahāpūjyā devalokavihāriṇī
dhyānādhikālasaṃjāpyā bhaktasantānabhāgyadā
madhyāhnakālasantapyā jaya saṃhāraśūlinī
tryambakā makhavidhvaṃsī tripurā
tripuraśūlinī
raṅgasthā rañjanī raṅgā sindūrāruṇaśālinī
sundaryupasundarī tu sūkṣmā mohanaśūlinī
aṣṭamūrtiḥ kalānāthā cāṣṭhahastā sutapradā
aṅgārakā gopanākṣī haṃsāsuramadāpahā
āpīnastananamrāṅgī haridrālepitastanī
indrākṣī hemasaṅkāśā hemavastrā harapriyā
īśvarī tvitihāsātmā ītibādhānivāriṇī
upāsyā conmadākārā hyullaṅghitasurāpahā
ūṣarasthalakāsārā hyutpalaśyāmalākṛtiḥ
ṛṅmayī sāmasaṅgītā śuddhā vai kalpavallarī
sāyantanāhutirdāsakāmadhenusvarūpiṇī
pañcādaśākṣarīmantrā tārakāvṛtaṣoḍaśā

hrīṃkāraniṣṭhā hrīṃkārā huṅkārī duritāpahā
ṣaḍaṅgā navakoṇasthā trikoṇā sarvatomukhī
sahasravadanā padmā śūlinī surapālinī
mahāśūladharā śaktirmātā māhendrapūjitā
śūladurgā śūlaharā śobhanā caiva śūlinī
śrīśūlinī jagadbījā mūlahuṅkāraśūlinī
prakāśā paramākāśā bhāvitā vīraśūlinī
nārasiṃhī mahendrāṇī sāḻī śarabhaśūlinī
ṝṅkā ṛtumatī caivāghorātharvaṇagopikā
ghoraghorā japārāgaprasūnāñcitamālikā
susvarūpā sauhṛdāḍhyā līḍhā dāḍimapāṭalā
layā ca lampaṭā līnā kuṅkumāruṇakandharā
ikārāḍhyā tviḻānāthā tviḻāvṛtajanāvṛtā
aiśvaryaniṣṭhā haritā haritālasamaprabhā
mahāśanā mahābhojyā yuktā yuktabhaṭānvitā
autsukyā cāṇimadgamyā tvakhilāṇḍanivāsinī
haṃsamuktāmaṇiśreṇīrhaṃsākhyā hāsakāriṇī
kalidoṣaharā kṣīrapāyinī viprapūjitā
khaṭvāṅgasthā khaḍgarūpā khabījā
kharasūdanā
ājyapāyinyasthimālā pārthivārādhyabāhukā
gambhīranābhikā siddhakinnarastrīsamāvṛtā
khaḍgātmikā ghananibhā vaiśyārcyā
mākṣikapriyā
makāravarṇā gambhīrā śūdrārcyā casavapriyā
cāturīpārvaṇārādhyā muktādhāvalyarūpiṇī
chandomayī bhaumapūjyā duṣṭaśatruvināśinī
jayinī cāṣṭamīsevyā krūrahomasamanvitā
jhaṅkārī navamīpūjyā lāṅgalīkusumapriyā

sadācaturdaśīpūjyā bhaktānāṃ puṣṭikāriṇī
jñānagamyādarśapūjyā ḍāmarī ripumāriṇī
satataṃ kalpasaṃvedyā kalikālasusandhidā
ḍambhākārā kalpasiddhā śalyakautukavardhinī
ḍhākṛtirkavivarārādhyā sarvasampatpradāyikā
navarātridinārādhyā rāṣṭradā rāṣṭravardhinī
pānāsavamadadhvaṃsī mūlikāsiddhidāyinī
phalapradā kuberāḍhyā pārijātaprasūnabhāk
balimantraughasaṃsiddhā
mantricintyaphalāvahā
bhaktipriyā bhaktigamyā kiṅkarā bhagamālinī
mādhavīvipinântasthā mahatī mahiṣārdinī
yajurvedagatā śaṅkhacakrahastāmbujadvayā
rājasā rājamātaṅgī rākācandranibhānanā
lāghavā rāghavārādhyā ramaṇījanamadhyagā
vāgīśvarī vakuḻamālyā vāṅmayī vāritāsukhā
śarabhādhīśavanitā candramaṇḍalamadhyagā
ṣaḍadhvāntaratārā ca raktajuṣṭā hutāvahā
tattvajñānānandakalāmayī sāyujyasādhanā
karmasādhakasaṃlīnaghanadarśanadā sadā
huṅkārikā sthāvarātmā tvamarī lāsyamodanā
laṃkāratrayasaṃbhūtā lalitā lakṣmaṇārcitā
lakṣmamūrtiḥ sadāhārā prasādāvāsalocanā
nīlakaṇṭhī haridrāśmiḥ śukī gaurī ca
gotrajā
aparṇā yakṣīṇī yakṣā haridrā halinī halī
dadatī conmadā cormī rasā viśvaṃbharā
sthirā
pañcāsyā pañcamī rāgā bhāgyā yogātmikāmbikā

gaṇikā caiva kālī tu vīṇā śoṇā raṇātmikā
ramā dūtī kalā siṃhī lajjā dhūmavatī jaḍā
bhṛṅgī saṅgī sakhī pīnā snehārogyā
manasvinī
raṇī mṛḍā dṛḍhā jyeṣṭhā ramaṇī yamunā ratā
musalī kuṇṭhitā moṭī caṇḍākhaṇḍā gaṇā balā
śuklā sraṣṭrī vaśā jñānī mānī nīlālakā śacī
sūrī candrā ghṛṇirghoṣā vīryakrīḍārasāvahā
nūtnā somā mahārājñī gayā yāgā hutaprabhā
dhūrtā sudhā dhanā līnā puṣṭirmṛṣṭā
sudhākarā
kariṇī kāminī muktāmaṇiśreṇiḥ phaṇī kharā
tārkṣyā sūkṣmā natācāryā gaurikā
girijāṅganā
indrajālā cendumukhī
tvindropendrādisaṃstutā
śivadūtī ca garalā śitikaṇṭhakuṭumbinī
jvalantī jvalanākārā jvālā jājvalyadambhadā
jvālāśayā jvālāmaṇirjotiṣāṃ gatireva hi
jyotiḥśāstrānumeyātmā jyotiṣī jvalitojjvalā
jyotiṣmatī durgavāsī jyotsnābhā
jvalanārcitā
laṅkārī lalitāvāsā lalitā lalitātmikā
laṅkādhipā lāsyalolā layabhogamayā layā
lāvaṇyaśālinī lolā lāṅgalā lalitāmbikā
lāñchanā lampaṭālaṅghyā lakulārṇavamuktidā
lalāṭanetrā lajjāḍhyā lāsyālāpā madākarā
jvālākṛtirjvaladbījā jyotirmaṇḍalamadhyagā

jyotistaṃbhā jvaladvīryā jvalanmātrā jvalatpalā
juṣirā jumpaṭā jyotirmālikā jyotikā smitā
jvaladvalayahastābjā jvalatprajvalakojjvalā
jvālāmālyā jagajjvālā jvalajjvalakasajjvalā
laṃbījā lelihāsātmā līlāklinnā layāpahā
lajjāvatī labdhaputrī lākinī lolakuṇḍalā
labdhabhāgyā labdhakāmā labdhadhīrlabdhamaṅgalā
labdhavīryā labdhavṛtā lābhā labdhavināśinī
lasadvastrā lasatpīṭhā lasanmālyā lasatrpabhā
śūlahastā śūrasevyā śūlinī śūlanāśinī
sukṛtyanumatī śūrpā śobhanā śūrpadhāriṇī
śūlasthā śūracittasthā śūlā śuklasurārcitā
śuklapadmāsanārūḍhā śuklā śuklāmbarā śukā
śukalālitahastābjā śvetā śukanutā śubhā
lalitākṣaramantrasthā liptakuṅkumabhāsurā
lipirūpā liptabhasmā liptacandanapaṅkilā
līlābhāṣaṇasaṃlolā līnakastūrikādravā
likhitāmbujacakrasthā likhyā likhitavaibhavā
nīlālakā nītimatī nītiśāstrasvarūpiṇī
nīcaghnī niṣkalā nityā nīlakaṇṭhapriyāṅganā
nirāśā nirguṇā nītā nirmadā nirupaplavā
nirnītā nirmalā niṣṭhā niraṅkuśaparākramā
nirviṇṇadānavabalā niśśeṣīkṛtatāṭakā
nirañjanakarā mantrī nirvighnapadanāśinī
nityaklinnā nirāhārā nīvī nīlāmbarāñcitā

niśācarakuladhvaṃsī nityānandaparamparā
nimbapriyā nirāveśā ninditāsurasundarī
nirghoṣā nigaḻākṛṣṭakṛttijālāvṛtāṅgaṇā
nīrasā nityakalyāṇī nirantarasukhapradā
nirlobhā nītimatprītā nirvaghnā nimiṣāpahā
duṃbījā duṣṭasaṃhārī durmadā duritāpahā
durutsāhamahāvīryā durmedotsavanāśinī
durmāṃsabhakṣiṇī duṣṭā dūrīkṛtaniśācarā
dūtī duṣṭagrahamadakhaṇḍī durbalarakṣakā
ṣṭaṅkārī ṣṭammayī ṣṭambhā ṣṭaṃbījā
ṣṭambhakīlakā
graheśvarī grahārādhyā grahiṇī rogamocinī
grahāveśakarī grāhyā gṛhagrāmābhirakṣiṇī
grāmauṣadhamahāvīryā grāmyasarvabhayāpahā
grahadveṣī grahārūḍhā grāmaṇī grāmadevatā
gṛhītabrahmamukhyāstrā gṛhītāyudhaśaktidā
grāsamāṃsā gṛhasthārcyā grahabhūtanivāriṇī
haṃbhūtā haladhṛksevyā harahārikucāñcalā
harṣapradā harārādhyā hāsanindyaniśācarā
havirbhoktrī haridrābhā haritāśvādhirohiṇī
haritpatisamārādhyā halākṛṣṭasurāsurā
hārītaśukavatpāṇirhayamedhābhirakṣakī
haṃsākṣarī haṃsabījā hāhākārā harāśugā
hayyaṅgavīnahṛdvṛttirhārītāṃśumaṇidyutiḥ
huṅkārātmā hutā homyā huṅkārālayanāyikā
huṅkārapañjaraśukā huṅkārakamalendirā
huṅkārarātrikājyotsnā huṅkāradrumamañjarī
huṅkāradīpikājvālā huṅkārārṇavakaumudī

huṃ phaṭkarī huṃ phaṭ dyutiḥ
huṅkārakārākāśabhāskarā
phaṭkārī sphāṭikākārā sphaṭikākṣakarāmbujā
phaṭkīlakārī phaṇṇāstrā
phaṭkārāhiśikhāmaṇiḥ
phaṭkārasumanomādhvī phaṭkārakamalendirā
phaṭkārasaudhaśṛṅgasthā
phaṭkārādhvaradakṣiṇā
phaṭkāraśuktikāmūrtiḥ paṭkāradrumamañjarī
phaṭkāravīrakhaḍgāstrā phaṭkāratanumadhyagā
phaṭkāraśibikārūḍhā phaṭkāracchatralāñchitā
phaṭkārapīṭhanilayā phaṭkārāvṛtamaṇḍalā
phaṭkārakuñjaramadapravāhā phālalocanā
phalāśīnī phalakarī phaladānaparāyaṇā
phaṭkārāstraphalākārā phalantī phalavarjitā
svātantryacaritā svasthā
svapnagrahaniṣūdinī
svādhiṣṭhānāmbujārūḍhā svayambhūtā
svarātmikā
svargādhipā svarṇavarṇā svāhākārasvarūpiṇī
svayaṃvarā svarārohā svaprakāśā svarapriyā
svacakrarājanilayā svasainyavijayapradā
svapradhānā svāpakārī svakṛtākhilavaibhavā
svairiṇī svedaśamanī svarūpajitamohinī
hānopādhivinirmuktā hānidaughanirāsanā
hastikuṃbhadvayakucā hastirājādhirohiṇī
hayagrīvasamārādhyā hastikṛttipriyāṅganā
hālīkṛtasvarakulā hānivṛddhivivarjitā
hāhāhūhūmukhastutyā haṭhadānitakṛttikā

hatāsurā hatadveṣā hāṭakādriguhāgṛhā
hallīnaṭanasantuṣṭā harigahvaravallabhā
hanumadgītasaṅgītā hāsitā harisodarī
hakārakandarāsiṃhī hakārakusumāsavā
hakāratataṭinīpūrā hakārajalapaṅkajā
hakārayāminījyotsnā hakārakhacitārasā
hakāracakrabālārkā hakāramarudīdhitiḥ
hakāravāsarāṅgī ca hakāragirinirjharā
hakāravāsagāṅgīca hakāravanakuñjarī
hakāramadhumādhuryā hakārāśramatāpasī
hakāramadhuvāsantī hakārasvarakākalī
hakāramantrabījārṇā hakārapaṭahadhvaniḥ
hakāranārīlāvaṇyā hakāraparadevatā
namo vedāntarūpāyai durgādevyai namo namaḥ
namo bhaktānukampā tu durgā śrīparadevatā
namo namo bhagavati trāhi māmaparādhinam

|| iti śivam ||

www.kamakotimandali.com